# Krishnalalanakhyavratanirupanam

# કૃષ્ણલાલનાખ્યવ્રતનિરૂપણમ્

## Document Information

Text title : Krishnalalanakhyavratanirupanam

File name : kRRiShNalAlanAkhyavratanirUpaNam.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 139/39-60||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2026

*sanskritdocuments.org*

# કૃષ્ણલાલનાખ્યવ્રતનિરૂપણમ્

અથ કૃષ્ણલાલનાખ્યં વ્રતં વચ્મિ ચ તે રમે ।
વિભૂતયો ભવન્ત્યેવ કૃષ્ણલાલનસદ્વ્રતાત્ ॥ ૩૯॥

કાર્તિકે ચૈત્રકે વૈશાખકે માર્ગે ચ ફાલ્ગુને ।
આષાઢે શુક્લકે દિનત્રયાત્મકં વ્રતં ત્વિદમ્ ॥ ૪૦॥

સુલઘુભુગ્દશમ્યાં તુ રાત્રૌ શીલવ્રતી ભવેત્ ।
કૃત્વા સાયન્તનીં પૂજાં ગૃહ્ણીયાન્નિયમં વ્રતી ॥ ૪૧॥

એકાદશ્યાં નિરાહારં કરિષ્યેઽહં વ્રતં ત્વિતિ ।
નમો નારાયણાયેતિ પ્રાતરુત્થાય ચિન્તયેત્ ॥ ૪૨॥

સ્નાત્વૈકાદશિકાપ્રાતર્મણ્ડપે પૂજયેત્ પ્રભુમ્ ।
અનાદિશ્રીકૃષ્ણનારાયણં માં પુરુષોત્તમમ્ ॥ ૪૩॥

શુક્લપુષ્પાક્ષતવારિકુઙ્કુમચન્દનાદિભિઃ ।
નમો વિભૂતયે પાદૌ નમોઽશોકાય જાનુની ॥ ૪૪॥

નમઃ કૃષ્ણાયેત્યૂરૂ ચ વિશ્વમૂર્તે નમઃ કટિમ્ ।
કન્દર્પાય નમો મેઢ્રં ફલં નારાયણાય ચ ॥ ૪૫॥

દામોદરાયેત્યુદરં વાસુદેવાય ચ સ્તનૌ ।
માધવાયેત્યુરો વિષ્ણોઃ કણ્ઠમુત્કણ્ઠિને નમઃ ॥ ૪૬॥

શ્રીધરાય મુખં કેશાન્ કેશવાયેતિ મસ્તકમ્ ।
પૃષ્ઠં શાર્ઙ્ગધરાયેતિ શ્રવણૌ શ્રુતિવેદિને ॥ ૪૭॥

હરયે શઙ્ખચક્રાસિગદાજલજપાણયે ।
શિરઃ સર્વાત્મને તસ્મૈ નમ ઇત્યભિપૂજનમ્ ॥ ૪૮॥

મત્સ્યમુત્પલસંયુક્તં હૈમં કૃત્વા તુ શક્તિતઃ ।
ઉદકુમ્ભે ન્યસેત્તચ્ચ દાને પ્રપૂજ્ય વૈ દિશેત્ ॥ ૪૯॥

ગુડપાત્રં તિલૈર્યુક્તં સિતવસ્ત્રાભિવેષ્ટિતમ્ ।
ફલાનિ વિવિધાન્યેવ દાને પ્રપૂજ્ય ચાર્પયેત્ ॥ ૫૦॥

આરાર્ત્રિકં પ્રકુર્યાચ્ચ વિભૂતિશ્રીશ્રીકૃષ્ણયોઃ ।
નૈવેદ્યાનિ વિચિત્રાણિ પ્રાતર્મધ્યે નિશામુખે ॥ ૫૧॥

દત્વા પ્રસ્વાપયેચ્ચાપિ ગીતવાદિત્રકોત્સવૈઃ ।
જાગરણં વ્રતી કુર્યાત્ પ્રાતઃ સ્નાત્વા પ્રપૂજયેત્ ॥ ૫૨॥

દ્વાદશ્યાં પ્રાર્થયેચ્ચાપિ પદ્મં દદ્યાદ્વિજાય તુ ।
ઉદકુમ્ભં સરત્નં ચ ગાં દદ્યાદ્ગુરવે તથા ॥ ૫૩॥

યથા ન મુચ્યસે કૃષ્ણ સદા સર્વવિભૂતિભિઃ ।
તથા મામુદ્ધરાશેષદુઃખસંસારસાગરાત્ ॥ ૫૪॥

શય્યાં દદ્યાદ્ધનં દદ્યાદ્ગ્રામં ક્ષેત્રં ગૃહાદિકમ્ ।
ગુરું સમ્પૂજ્ય વિધિવદ્ભૂષાવસ્ત્રાણિ ચાર્પયેત્ ॥ ૫૫॥

અધનઃ પૂજયેત્પુષ્પૈર્ભોજનાન્નં દિશેદ્વ્રતી ।
અનેન વિધિના યસ્તુ કૃષ્ણલાલનસદ્વ્રતમ્ ॥ ૫૬॥

વિભૂતિસમ્પ્રદં કુર્યાત્તસ્યર્દ્ધયઃ પદે પદે ।
પાપાનિ તસ્ય નશ્યન્તિ પિતૃણાં તારયેચ્છતમ્ ॥ ૫૭॥

જન્મનાં શતસાહસ્રં ન શોકફલભાગ્ભવેત્ ।
ન તુ વ્યાધિર્ભવેત્તસ્ય ન દારિદ્ર્યં ન બન્ધનમ્ ॥ ૫૮॥

યાવદ્યુગસહસ્રાણાં શતમષ્ટોત્તરં ભવેત્ ।
તાવત્સ્વર્ગે વસેચ્ચાપિ ભૂપતિઃ સઃ પુનર્ભવેત્ ॥ ૫૯॥

વ્રતં કૃત્વા હરેર્ધામ પ્રયાત્યેવ ન સંશયઃ ।
સર્વાન્ કામાનશ્નુતે ચ કૃષ્ણેન હરિણા સહ ॥ ૬૦॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય તૃતીયખણ્ડે
૧૩૯-અધ્યાયાન્તર્ગતં કૃષ્ણલાલનાખ્યવ્રતનિરૂપણં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૩૯/૩૯-૬૦॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 139/39-60..

Proofread by PSA Easwaran

*Krishnalalanakhyavratanirupanam*
pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*